**PURANETIHASA**

**ACHARYA 2nd YEAR**
**Course/Paper.9**

**PART - B**

# कल्किपुराणम् (१-३५ अध्यायाः)

***Kalkipurāṇam (1-35 adhyāyāḥ)***


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# कल्किपुराणम्

## सम्पूर्णांशत्रयम्(Chapter 1 -35)

## स्वाध्ययनसामग्री

### उपक्रमः

भारतीयवाङ्मये वेदानामनन्तरं महत् गौरवास्पदं भजन्ते पुराणानि । तानि च पुराणानि प्राचीनपरम्परायाः प्रतिपादकानि भवन्ति । यथोक्तं "वायुपुराणे- पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्" । एतेषां पुराणानां रचनाकर्ता भवति महर्षिः कृष्णद्वैपायनव्यासदेवः । विष्णोः अंशावतारः पुरुषसत्तमः सः महर्षिव्यासदेवः असाधारणप्रतिभासम्पन्नः सनातनधर्मस्य प्रतिष्ठापकः,स्त्रीशूद्रद्विजबन्धूनां वेदज्ञानज्ञापको ब्रह्मसूत्रकारी च सदैव समेषामस्माकं भारतीयानां प्रणम्य विराजते । यद्यपि व्यासदेवकृतानि महापुराणनि अष्टादशसंख्यकानि तथापि उपपुराणान्यपि तथैव प्रसिद्धानि सन्ति । उपपुराणेषु अन्यतमं वैशिष्ट्यमारोहते कल्किपुराणमिदं प्रशस्तम् । यत्तु भविष्यपुराणानुवर्तनं कृत्वा प्रचलदपि भागवतपुराणस्य भागवतधर्मविषयेष्वपि सम्यक् अनुवर्तते । भगवतः कल्केः अवतारवर्णनं पुराणेऽस्मिन् दरीदृश्यते । महर्षिव्यासविरचितस्यास्य उपपुराणस्य नाम भवति कल्किपुराणम् । अष्टादश उपपुराणेषु कल्किपुराणमन्यतमम् । अस्मिन् उपपुराणे कल्क्यवतारमुद्दिश्य विविधविषयाः उपन्यस्ताः सन्ति । अस्मिन् कल्किपुराणे षड्षष्ट्युत्तरत्रयोदशशतश्लोकाः(1366) सन्ति । अस्मिन् पुराणे त्रयः अंशाः एवं पञ्चत्रिंशदध्यायाः विद्यन्ते । अस्मिन् पुराणे भविष्यद्विषये वर्णितमस्ति । द्वापरयुगादनन्तरं कलियुगमागच्छति । यदा पापस्य भारः अत्यधिको भवति तदा भगवान् विष्णुः अवतारं गृह्णाति । भगवतो विष्णोः तेष्वेव अवतारेषु दशमावतारो भवत्येषः कल्क्यवतारः इति । तस्यैव भगवतः कल्क्यवतारस्य चरितमस्मिन् कल्किपुराणे विभिन्नप्रसङ्गपुरःसरं सविशदं वर्णितमस्ति । विषयानुगततया अस्मिन् पुराणे अधर्मवंशतः कलेः उत्पत्तिः,कलिदोषः,कल्केः जन्मग्रहणं, कल्केः उपनयनं विद्याशिक्षा च, कल्केः धर्मकथनं, पद्मावतीस्वयंवरः, पद्मावत्याः कल्किदेवे अनुरक्तिः, दशावताररूपेण कल्केः स्तुतिः, सृष्ट्युत्पत्तिविषये वर्णनं, कल्केः चातुर्वर्ण्योपदेशः, अनन्तमुनिकथा, कल्केः धर्मयुद्धादिकं, मरुदेवापिद्वारा सूर्यवंशस्य तथा चन्द्रवंशस्यापि वर्णनं, कलिकल्क्योः मध्ये युद्धं,सम्पूर्णकल्किपुराणस्य सारांशः श्रवणफलञ्चेति विषयाः विशेषतः पर्यवसिताः सन्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य कल्किपुराणस्य आदितः पञ्चत्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र विषयसारतः चतुरंशेषु विभज्य सम्यगालोचिताः सन्ति ।

# प्रथमांशः

**प्रस्तावना-**

उपपुराणेषु अन्यतमं वैशिष्ट्यमारोहते कल्किपुराणमिदं प्रशस्तम् । यत्तु भविष्यपुराणानुवर्तनं कृत्वा प्रचलदपि भागवतपुराणस्य भागवतधर्मविषयेष्वपि सम्यक् अनुवर्तते । भगवत: कल्के: अवतारवर्णनं पुराणेऽस्मिन् दरीदृश्यते । अस्मिन् उपपुराणे कल्क्यवतारमुद्दिश्य विविधविषयाः उपन्यस्ताः सन्ति । अस्मिन् कल्किपुराणे षड्षष्ट्युत्तरत्रयोदशशतश्लोकाः(1366) सन्ति । अस्मिन् पुराणे त्रयः अंशाः एवं पञ्चत्रिंशदध्यायाः विद्यन्ते । अस्मिन् पुराणे भविष्यद्विषये वर्णितमस्ति । द्वापरयुगादनन्तरं कलियुगमागच्छति । यदा पापस्य भारः अत्यधिको भवति तदा भगवान् विष्णुः अवतारं गृह्णाति । भगवतो विष्णोः तेष्वेव अवतारेषु दशमावतारो भवत्येषः कल्क्यवतारः । तस्यैव भगवतः कल्क्यवतारस्य चरितमस्मिन् कल्किपुराणे विभिन्नप्रसङ्गपुरःसरं सविशदं वर्णितमस्ति । विषयानुगततया अस्मिन् पुराणे अधर्मवंशतः कलेः उत्पत्तिः,कलिदोषः,कल्केः जन्मग्रहणं, कल्केः उपनयनं विद्याशिक्षा च, कल्केः धर्मकथनं, पद्मावतीस्वयंवरः, पद्मावत्याः कल्किदेवे अनुरक्तिः, दशावताररूपेण कल्केः  स्तुतिः, सृष्ट्युत्पत्तिविषये वर्णनं, कल्केः चातुर्वर्ण्योपदेशः, अनन्तमुनिकथा, कल्केः धर्मयुद्धादिकं, मरुदेवापिद्वारा सूर्यवंशस्य तथा चन्द्रवंशस्यापि वर्णनं, कलिकल्क्योः मध्ये युद्धं,सम्पूर्णकल्किपुराणस्य सारांशः श्रवणफलञ्चेति विषयाः विशेषतः पर्यवसिताः सन्ति ।  प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य कल्किपुराणस्य आदितः पञ्चत्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र विषयसारतः चतुरंशेषु विभज्य सम्यगालोचिताः सन्ति । ततः चतुरंशेषु विभक्तस्यास्य पाठ्यांशस्य प्रथमांशेस्मिन् विशेषतः अधर्मवंशतः कलेः उत्पत्तिः,कलिदोषः,देवानां स्तुतितः भगवतो विष्णोः कल्क्यवताररूपेण जन्मग्रहणं, कल्केः उपनयनं विद्याशिक्षा च,विशाखयूपराजस्य कृते कल्किदेवस्य साधुधर्मकथनपूर्वकतया विप्रलक्षणं भक्तिलक्षणञ्च सम्यगुपदिष्टमिति विषयाः अत्र सविशदमालोचिताः सन्ति ।

## उद्देश्यम् –

प्रियपाठकाः कल्किपुराणस्यास्य प्रस्तुतेस्मिन् पाठ्यांशे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

1. अधर्मवंशतः कलेः उत्पत्तिः,कलिदोषवर्णनञ्चेति विषयाणामुपस्थापनम् ।

2. देवानां स्तुतितो भगवतो विष्णोः कल्क्यवताररूपेण जन्मग्रहणम् ।

3. कल्केः नामकरणम्, उपनयनं विद्याशिक्षा चेति विषयाणामुपस्थापनम् ।

4. विशाखयूपराजस्य कृते कल्किदेवस्य साधुधर्मकथनपूर्वकतया विप्रलक्षणं भक्तिलक्षणञ्चेति विषयाणामुपस्थापनम् ।

## अधर्मवंशतः कलेः उत्पत्तिः,कलिदोषवर्णनञ्चेति विषयाणामुपस्थापनम्

**तत्र कल्किपुराणस्यास्य प्रथमाध्याये** वैदिकतान्त्रिकादिरीत्या विघ्नेशं नमस्कृत्य कल्किमाहात्म्यमुद्घोष्यते । स कल्किः स्वयमेव हरिर्नारायणः । नैमिषारण्ये शौनकादय ऋषय सूतात् कल्किधर्मं श्रोतुमैच्छन् । किन्तु तस्योत्तरे सूतो भागवतपुराणे यथा तेन मार्कण्डेयाय भागवतधर्मा निवेदितास्तदेव स वक्तुमारभते । अधर्मः स्वयमेव ब्रह्मणः पृष्ठभागात् जन्म लेभे । तस्यैवाधर्मस्य वंशे भयंकररूपी कलिरपि जन्म लब्ध्वा स्वकालुष्यं पृथिव्यां सर्वत्र यथायथं प्रचारयन्नास्ते । तस्मिन्नेवावसरे लोका अपि भृशं नीचमनसोऽवनते: परां काष्ठामापन्नाः भयावहमपि परधर्ममाश्रित्य स्वेच्छया वेदपुराणविरुद्धाचरणे कृतमतयो विहरन्ति । विशेषतः कामक्रोधाभिभूता मनुष्याः कलौ युगे भगवन्तमवजानन्ति । सर्वे जनाः केवलायां विषयलिप्सायां मग्ना एव । श्रुतिस्मृत्यादिभिर्विवर्जितो मनुष्यो भगवद्भक्तिशून्यः सन् दिनं यापयति कलौ युगे । अतः कलौ युगे मनुष्याणामात्यन्तिककल्याणार्थं भगवान् धरायामवतरति । कलावसुराः यवनांशेषु जन्म प्राप्य लोकोपतापिनो भवन्ति । अतः केवलस्यात्याचारस्य अविचारस्य च प्रादुर्भावो भवति । वैश्याः कूटवृत्तिमवलम्ब्य केवलं विषयमेव सर्वस्वं मन्यन्ते । ब्राह्मणा धर्मनष्टा,वेदरहिताः,सदाचारविवर्जिताश्च भवन्ति । क्षत्रियास्त्यक्तराज्याः शूद्राः स्वामिष्वभक्ताश्च जायन्ते । स्त्रियः पररताः सुताः त्यक्तमातृपितृस्नेहाः तच्छुश्रूषारहिता भवन्ति । तदातिभारा धरा गोरूपं धृत्वा ब्रह्मसदनं संप्राप्य ब्रह्मणे स्वदुःखानि निवेदितवती । धरण्याः दुःखमवगम्य ब्रह्मा क्षणं विचिन्त्य देवताभिः धरण्या च सह शीघ्रं वैकुण्ठमागत्य भगवन्तं विष्णुमस्तौत् ।

**बोधप्रश्नः-**

1. ब्रह्मणः पृष्ठभागात् कः जन्म लेभे ?

2. कामक्रोधाभिभूता मनुष्याः कलौ युगे भगवन्तमवजानन्ति ?

## देवानां स्तुतितो भगवतो विष्णोः कल्क्यवताररूपेण जन्मग्रहणम्

अधर्मस्य विनाशाय धर्मसंस्थापनार्थाय च श्रीविष्णु: तदा तदा धरातले अवतारत्वेन आगतवान् । तद्यथा-

**मत्स्यः कूर्मो वराहश्च नरसिंहोऽथो वामन: ।**
**रामो रामश्च कृष्णश्च बौद्धः कल्किश्च ते दश ।।**

भगवतः श्रीविष्णोः दशमावतारो भवति कल्क्यवतारः । तस्मिन् विषये कल्किपुराणेऽस्मिन् प्रथमांशस्य द्वितीयाध्याये सम्यक् विवरणमुपन्यस्तमस्ति । पृथिवीमिमां कलिकालपीडितां वीक्ष्य देवगणाः ब्रह्मदेवस्य समीपे गत्वा धरायां कथं कलिकालप्रभावतो धर्मस्य हानिर्भवतीति निवेदितवन्तः । ततो ब्रह्मदेवैः सह मिलित्वा ते देवाः वैकुण्ठमागत्य भगवतो विष्णोः स्तुतिमाचरितवन्तः । तदा देवानां स्तुतितः सन्तुष्टो भगवान् विष्णुः सर्वान् देवान् आश्वास्य प्रोक्तवान् यत्- हे देवाः पृथिवीतः कलिदोषान् विनश्य सद्धर्मान् स्थापयितुमहं शम्भले ग्रामे विष्णुयशसो गृहे कल्क्यवतारत्वेन जनिं लप्स्ये । मम मातुः नाम सुमतिः भविष्यति । मम पत्नी लक्ष्म्यंशेन समुत्पन्ना सिंहलदेशस्य राजकन्या पद्मा एव भविष्यति । हे देवाः भवन्त: सर्वेपि स्वांशेन पृथिव्यामवतरन्तु । अहं तत्र पृथिवीतः कलिदोषगतान् अधर्मान् सर्वान् विनश्य सद्धर्मस्थापनपूर्वकतया मरु तथा देवापि राजद्वयं पृथ्वीलोके सम्यक् संस्थाप्य ततो वैकुण्ठलोकं पुनरागमिष्यामि । ततः परमकालशोभने यदा सर्वेपि पञ्च शुभग्रहाः स्वराशिषु उच्चस्थाने अवस्थिताः आसन् तदा तस्मिन् शुभकाले शम्भलग्रामे विष्णुयशसः पत्न्याः सुमत्याः गर्भे शशिसूर्यग्रहनक्षत्रादिभिः परिसेवित: परमशोभनः भगवान् विष्णुः प्रविष्टोभूत् । तद्यथा-

**सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम् ।**
**ग्रहनक्षत्रराश्यादिसेवितश्रीपदाम्बुजम् ।।"**

विष्णोः उत्पत्तिकारणात् गिरयः,समुद्राः,सप्तलोकाः,स्थावरजङ्गमाः,ऋषयः, देवाश्च सर्वे प्रसन्नाः सञ्जाताः। ते सर्वे प्रसन्नाः भूयः सानन्दं नर्तितवन्तः। देवाः भगवतो विष्णोः यशोगानं कृतवन्तः । गन्धर्वाणां मधुरगानेन अप्सरोगणाः भूरिशो नर्तितवन्तः । वैशाखमासे शुक्लपक्षस्य द्वादश्यां तिथौ भगवान् विष्णुः कल्क्यवतारत्वेन धरामवततार। तद्यथा-

**द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः।**
**जातं ददृशतुः पुत्रं पितरौ हृष्टमानसौ ॥**

महाषष्ठी देवी विष्णोरवतारस्य कल्केः धात्री अभूत्, अम्बिका नाभिच्छेत्री,देवी सावित्री च गात्रमार्जनोद्योता अतिष्ठत् । विष्णोरवतारस्य कल्केः कृते वसुधादेवी दुग्धरूपसुधाधारां धृतवती। विष्णोः चतुर्भुजरूपं दृष्ट्वा ब्रह्मदेवो पवनदेवमादिष्टवान् यत्- त्वं प्रसूतिगृहं गत्वा साधारणमनुष्यरूपं धारयितुं कल्किरूपं विष्णुं प्रबोधय। ब्रह्मदेवस्य आज्ञानुसारं कल्किदेवः चतुर्भुजरूपं विहाय साक्षात् द्विबाहुपरं साधारणबालकरूपं धृतवान् । पितरौ तादृशं पुत्रं संप्राप्य आनन्दतुन्दिलौ अभवताम् । ततः सर्वत्रापि शम्भलग्रामे नगरे जनैः महोत्सवः परिपालितोभूत् । एवम्प्रकारेण अत्र भगवतो विष्णोः अवतारस्य कल्केः जन्मविवरणं यथाग्रन्थमाविष्कृतमस्ति।

**बोधप्रश्नः-**

1. भगवतः श्रीविष्णोः दशमावतारः कः ?
2. कल्केः मातुः नाम किमासीत् ?

## कल्केः नामकरणम्, उपनयनं विद्याशिक्षा चेति विषयाणामुपस्थापनम्

विष्णोः अवतारस्य कल्केः जन्मनः अनन्तरं तस्य पितरौ आनन्दतुन्दिलौ बहुशो दानपुण्यमाचरितवन्तौ एवं पवित्रान्तःकरणतया ऋक्-साम-यजुर्वेदमन्त्रज्ञातृवर्यान् ब्राह्मणान् आहूय पुत्रस्य नामकरणमुत्सवमायोजितवन्तौ । तदा बालरूपं कल्किं द्रष्टुं परशुरामः,कृपाचार्यः,व्यासः अश्वत्थामादयः भिक्षुशरीरेण तत्र आगतवन्तः । सूर्यसदृशान् तेजस्विनः तान् आगतान् वीक्ष्य कल्केः पितृदेवः तेषां यथायोग्यं स्वागतसत्कारं विहितवान्।

सम्यक् पूजिताः महार्घासनेषु उपविष्टाः भूयः स्वपितुः विष्णुयशसः क्रोडे आनन्देन क्रीडन्तं भगवतः अवतारं बालरूपं तं कल्किं वीक्ष्य ते महर्षयः सप्रश्रयं प्रणमितवन्तः । तञ्च बालरूपं कल्किं कलियुगस्य कल्कविनाशार्थमाविर्भूतमिति विज्ञाय ते महापुरुषाः तस्य बालकस्य कल्किरिति नामकरणं कृतवन्तः । तद्यथा-

**कल्किं कल्कविनाशार्थमाविर्भूतं विदुर्बुधाः ।।**

ततो बालकल्केः विधिपूर्वकतया जातकर्मसंस्कारादीन् विधाय हृष्टमानसाः ते महर्षयः स्वस्थानं प्रति प्रत्यागताः अभवन् । ततो मात्रा सुमत्या परिपालितः स बालरूपः कल्किः शुक्लपक्षशशी इव ववृधे । कल्केः कविः, प्राज्ञः, सुमन्त्रकः इति नाम्ना त्रयो ज्येष्ठभ्रातरः आसन् । ते सर्वेपि पितृमातृप्रियकराः गुरुविप्रप्रतिष्ठिताश्च आसन् । एवञ्च कल्किवंशे समुत्पन्नाः गार्ग्यभर्ग्यविशालाद्याः कल्किदेवस्य अनुगताः एव अभवन् । ततो विष्णुयशाः स्वपुत्रस्य कल्केः यज्ञोपवीतसंस्कारादीन् विधाय गायत्रीमन्त्रवाचनञ्च कारयित्वा तं वेदाध्ययनं कर्तुमुपदिष्टवान् । ततो गुरोः परशुरामसकाशात् वेदादीनि सर्वशास्त्राणि पठित्वा भगवान् कल्किः भगवद्बिल्बोदकेश्वरशिवसकाशात् कञ्चन कामचारिणमश्वममूल्यं शुकपक्षिणमथ च निशितं खड्गमेकं लब्धवान् ।

**बोधप्रश्नः-**

1. कल्केः पितुः नाम किमासीत् ?
2. कल्केः कति ज्येष्ठभ्रातरः आसन् ?

## विशाखयूपराजस्य कृते कल्किदेवस्य साधुधर्मकथनपूर्वकतया विप्रलक्षणं भक्तिलक्षणञ्चेति विषयाणामुपस्थापनम्

वेदादीनि सर्वशास्त्राणि पठित्वा भगवान् कल्किः भगवद्बिल्बोदकेश्वरशिवसकाशात् कञ्चन कामचारिणमश्वममूल्यं शुकपक्षिणमथ च निशितं खड्गमेकं लब्धवान् । ततश्च स कल्किः शम्भलग्रामं प्रत्यागत्य वर्णाश्रमधर्मं द्रढयति, वेदमार्गं सुप्रतिष्ठापयति । अन्ते च माहिष्मतीनृपेण विशाखयूपेन सह कलियुगमाहात्म्यं प्रकटीकर्तुं प्रयतते । विशाखयूपनृपाय **साधुधर्मकथनपूर्वकतया** सृष्टेरुत्पत्तिस्थितिरित्यादिकं विषयं तथा ब्राह्मणानां चरित्रमाहात्म्यञ्च निवेदयित्वा कल्किः भक्तिलक्षणञ्चापि आविष्कृतवान् ।

**बोधप्रश्नः-**

1. कल्किः कं नृपमुपदिष्टवान् ?

## सारांशः

प्रस्तुतपाठ्यांशस्य प्रथमांशेस्मिन् विशेषतः अधर्मवंशतः कलेः उत्पत्तिः,कलिदोषः,देवानां स्तुतितो भगवतो विष्णोः कल्क्यवताररूपेण जन्मग्रहणं, नामकरणं,कल्केः उपनयनं विद्याशिक्षा च,विशाखयूपराजस्य कृते कल्किदेवस्य साधुधर्मकथनपूर्वकतया विप्रलक्षणं भक्तिलक्षणञ्च सम्यगुपदिष्टमिति विषयाः अत्र सविशदमालोचिताः सन्ति ।

## आदर्शप्रश्नाः

### लघूत्तरीयप्रश्नाः-

1. श्रीविष्णोः कृते देवानां स्तुतिमाविष्कुरुत ।
2. कल्किरिति नामकरणं प्रपञ्चयत ।
3. विशाखयूपस्य विषये लिखत ।

### विश्लेषणात्मकप्रश्नाः-

1. कलिकालगतदोषान् आविष्कुरुत ।
2. कल्केः नामकरणप्रसङ्गमाविष्कुरुत ।

### निबन्धात्मकप्रश्नाः-

1. देवानां स्तुतितो भगवतो विष्णोः कल्क्यवताररूपेण जन्मग्रहणं विशदयत ।
2. कल्केः नामकरणम्, उपनयनं विद्याशिक्षा चेति विषयाणामुपस्थापनं कुरुत ।

**एकाङ्कप्रश्नाः-**

1. कल्केः पितुः नाम किम् ।

2. कल्केः मातुः नाम किम् ।

3. कस्मिन् ग्रामे कल्केः जन्मग्रहणमभूत् ।

4. कविः नाम कः ।

5. प्राज्ञो नाम कः ।

6. सुमन्त्रकः कः ।

7. कल्केः गुरुः कः ।

8. विशाखयूपनृपः कस्य नगरस्य राजा आसीत् ।

9. ब्रह्मणः पृष्ठभागात् कः उत्पन्नोभूत् ।

10. कल्किः कस्मात् देवात् वरं प्राप्तवान् ।

**उत्तराणि-** 1.विष्णुयशा 2.सुमतिः 3.शम्भलग्रामे 4.कल्केः भ्राता 5. कल्केः भ्राता 6. कल्केः भ्राता 7. परशुरामः 8. माहिष्मतीपुरस्य 9. अधर्मः 10. शिवसकाशात्

## द्वितीयांशः

द्वापरयुगादनन्तरं कलियुगमागच्छति । यदा पापस्य भारः अत्यधिको भवति तदा भगवान् विष्णुः अवतारं गृह्णाति । भगवतो विष्णोः तेष्वेव अवतारेषु दशमावतारो भवत्येषः कल्क्यवतारः । तस्यैव भगवतः कल्क्यवतारस्य चरितमस्मिन् कल्किपुराणे विभिन्नप्रसङ्गपुरःसरं सविशदं वर्णितमस्ति । विषयानुगततया अस्मिन् पुराणे अधर्मवंशतः कलेः उत्पत्तिः,कलिदोषः,कल्केः जन्मग्रहणं, कल्केः उपनयनं विद्याशिक्षा च, कल्केः धर्मकथनं, पद्मावतीस्वयंवरः, पद्मावत्याः कल्किदेवे अनुरक्तिः, दशावताररूपेण कल्केः स्तुतिः, सृष्ट्युत्पत्तिविषये वर्णनं, कल्केः चातुर्वर्ण्योपदेशः, अनन्तमुनिकथा, कल्केः धर्मयुद्धादिकं, मरुदेवापिद्वारा सूर्यवंशस्य तथा चन्द्रवंशस्यापि वर्णनं, कलिकल्क्योः मध्ये युद्धं,सम्पूर्णकल्किपुराणस्य सारांशः श्रवणफलञ्चेति विषयाः विशेषतः पर्यवसिताः सन्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य कल्किपुराणस्य आदितः पञ्चत्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र विषयसारतः चतुरंशेषु विभज्य सम्यगालोचिताः सन्ति । ततः चतुरंशेषु

विभक्तस्यास्य पाठ्यांशस्य द्वितीयांशेस्मिन् विशेषतः पद्मावतीस्वयंवरः, पद्मावत्याः कल्किदेवे अनुरक्तिः, दशावताररूपेण कल्केः स्तुतिरिति विषया अत्र सम्यगुपन्यस्ताः सन्ति ।

## उद्देश्यम् -

प्रियपाठकाः कल्किपुराणस्यास्य प्रस्तुतेस्मिन् पाठ्यांशे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

1. सिंहलदेशस्य राजकन्यायाः पद्मायाः तपश्चरणं तथा भगवतः शिवसकाशात् वरप्राप्तिविषयोपस्थापनम् ।

2. पद्मावतीस्वयंवरवृत्तान्तः ।

3. कल्किदेवस्य दर्शनमात्रेण स्त्रीभावात् मुक्तानां राज्ञां दशावताररूपेण कल्केः स्तुतिकरणम् तद्धिया दशावतारतत्त्वनिरूपणञ्च

## सिंहलदेशस्य राजकन्यायाः पद्मायाः तपश्चरणं तथा भगवतः शिवसकाशात् वरप्राप्तिविषयोपस्थापनम्

कल्किपुराणे महर्षिशौनकादिभिः सह सूतमहर्षेः कलिकालविषयकसम्बादक्रमे सिंहलदेशस्य राजकन्यायाः पद्मावत्याः स्वयंवरविषयः सम्यक् उपन्यस्तोस्ति । सिंहलदेशस्य राजा बृहद्रथ आसीत् । तस्य पद्मा नामिका एका सुन्दरकन्या आसीत् । सा पद्मा अत्यन्तं रूपवती तथा गुणान्विता च आसीत् । तस्याः रूपगुणानां वर्णना अतुलनीया एव आसीत् । एकस्मिन् समये पद्मायाः तपस्यया सन्तुष्टो भगवान् शिवः अत्यन्तं प्रसन्नो भूयो वरदानरूपेण अकथयत् यत्- स्वयं भगवान् विष्णुः कल्किरूपेण तव वरणं करिष्यति । एवं विष्णुं विहाय ये सर्वे अन्ये जनाः त्वां कामभावतोभिलषिस्यन्ति ते सर्वे तत्क्षणात् स्त्रीभावं प्राप्स्यन्ति इति ।

**कामभावेन भुवने ये त्वां पश्यन्ति मानवाः ।**
**तेनैव वयसा नार्यो भविष्यन्त्यपि तत्क्षणात् ।।**

परन्तु भगवतो विष्णोः कृते एषः शापो न भविष्यति। अतः भवती इदानीं तपश्चरणं त्यक्त्वा गृहं गच्छतु। हे कमले उत्तेजिता मा भवतु। प्रसन्ना तिष्ठतु। एवम्प्रकारेण वरदानं विधाय भगवान् शिवः ततोन्तर्हितोभूत्।

**मा क्षोभय हरे पत्नि! कमले! विमलं कुरु।**
**इति दत्वा वरं सोमस्तत्रैवान्तर्दधे हरः।।**

अनन्तरं भगवतः शिवसकाशात् वरदानं संप्राप्य पद्मा तमेव देवदेवं जगत्पतिं महादेवं प्रणम्य स्वनिवासस्थानं प्रत्यागतवती ।

बोधप्रश्नः-

1. बृहद्रथः कस्य देशस्य राजा आसीत् ?
2. पद्मावत्याः पितुः नाम किमासीत् ?

## पद्मावतीस्वयंवरवृत्तान्तः

बहुकालानन्तरं पद्मायाः युवावस्थामालोक्य तस्याः पिता महाराजो बृहद्रथः अत्यन्तं चिन्ताग्रस्थः सञ्जातः । बृहद्रथः स्वपत्नीं उक्तवान् - हे कौमुदि! पद्मायाः विवाहमेकेन उच्चकुलोत्पन्नेन सच्चरित्रेण राज्ञा साकं कारयितुमहमिच्छामि । एवम्प्रकारेण पद्मायाः विवाहविषये राजा वृहद्रथः स्वपत्न्या साकं बहुशः वार्तालापं विहितवान्। परन्तु तस्य पत्नी राज्ञी कौमुदी पद्मायाः भाविवरविषये महादेवस्य शिवस्य वरदानप्रकारतां जानाति स्म । अतः सा पद्मायाः विवाहविषये शिवस्य वरदानप्रकारतां तस्याः पतिं नाम राजानं बृहद्रथं सर्वमुक्तवती। परन्तु राजा बृहद्रथः अकथयत् यत्- अहं कदापि भगवन्तं विष्णुं जामातृरूपेण प्राप्तुं न शक्नोमि। कारणमहं एतादृशो भाग्यशाली नास्मि। तद्यथा-

**न मे भाग्योदयः कश्चित् येन जामातारं हरिम्**
**वरयिष्यामि कन्यार्थे वेदवत्या मुनेर्यथा।**
**इमां स्वयंवरां पद्मां पद्मामिव महोदधेः**
**मथने सुरदेवानां तथा विष्णुर्ग्रहीष्यति।।**

यदा पद्मायाः युवावस्था अभवत्। तदा तस्य पिता बृहद्रथः एकस्याः स्वयंवरसभायाः आयोजनं कृतवान् । कारणं तदानीन्तनकाले राजपरिवारे विवाहार्थं स्वयंवरसभायाः आयोजनं भवति स्म । सिंहलदेशस्य राजकन्यायाः पद्मायाः स्वयंवरो भवतीति विज्ञाय

दिग्दिगन्तरेभ्यो विभिन्नदेशभ्यः अनेकाः राजानः तत्र स्वयंवरसभायां समुपागताः अभवन् । तस्मिन् समये सिंहलदेशः सुसज्जितः समलङ्कृतः सम्यक् साधुः सुशोभनः सततं संशोभते स्म । तस्यां स्वयंवरसभायां अत्यन्तं गुण,सदाचार, आयु, रूप, विद्या, एवं धनयुक्ताः नृपाः समागताः आसन् । तेषां निवासार्थं सिंहलदेशे बहूनि रम्यभवनानि व्यवस्थापितानि आसन् । राजकन्यां पद्मां परिणेतुमनेकाः राजानः सुसज्जितगजमारुह्य सुवर्णयुक्तेन रथेनापि सिंहलदेशमागतवन्तः । तेषां वपुषिं सुवर्णालंकारैः नितरां सुशोभितानि प्रकाशन्ते स्म । इन्द्रतुल्याः अनेकाः महापराक्रमिशालिनो राजानस्तत्र समुपागताः अभवन् ।

**श्वेतच्छात्रकृतच्छायाः श्वेतचामरवीजिताः ।**
**शस्त्रास्त्रतेजसा दीप्ता देवाः सेन्द्रा इवाभवन् ।।**

ते राजानः यथा- रुचिराश्वः, सुकामी, मदिराक्षः, कृष्णसारः, दृढाशुगः,पारदः,माशः, कङ्कादिमहाबलशालिनः राजानस्तत्र समागताः आसन् । सा राजकन्या पद्मा अत्यन्तसुन्दरवस्त्रपरिहिता सततं संशोभते स्म । तस्याः रूपयौवनं अत्यन्तं सुन्दरमाकर्षणीयञ्चासीत् । सर्वे राजानः पद्मायाः आगमनं प्रति अपेक्षमाणाः आसन् । तस्मिन् समये सा राजकन्या पद्मा अत्यन्तसुन्दरभावेन सुसज्जिता सालङ्कृता चापि तदेव रम्यं स्वयंवरसभाङ्गणं सखिभिः परिवारिता सती सानन्दं प्रविष्टवती । सुवर्णालङ्कारेण परिशोभिता सा अत्यन्तसुन्दरी कल्याणी राजकन्या पद्मा शनैः शनैः स्वयंवरसभामण्डपं प्रति आगतवती । तस्मिन् समये पद्मायाः पिता सिंहलदेशस्य राजा वृहद्रथः अत्यंतमधुरस्वरेण सर्वान् राजवर्गान् सम्बोधितवान् । राजकन्यायाः पद्मायाः पादपद्मगतमधुरनूपुरस्वरेण तत्रस्थाः सर्वेपि राजानः अत्यन्तमोहिताः अभवन् । रक्तिमरेशमीवस्त्रपरिहिता सा कोकिलकण्ठी राजकन्या पद्मा स्वरूपमाधुर्येण त्रिलोकं मोहयन्तीव तदेव भव्यं नव्यं स्वयंवरसभामण्डपं सल्लजं प्रविष्टवती ।

**वेदीमध्यारुणक्षौमवसना कोकिलस्वरा ।**
**रूपलावण्यपण्येन क्रेतुकामा जगत्त्रयम् ।।**

तदा तादृशीम् अत्यन्तसुन्दरीं राजकन्यां पद्मां दृष्ट्वा तत्रागताः सर्वेपि नृपाः सर्वतोभावेन संमोहिताः भूयः कामवासनागतहृदयधिया तामवलोकितवन्तः । यस्य फलस्वरूपेण ते सर्वेपि नृपगणाः तत्क्षणात् स्त्रीभावमासाद्य तेनैव तेनैव वयसा नार्यः भूत्वा पृथिव्यां पतिताः अभवन् । पद्मायाः कृते शिवदत्तपूर्ववरप्रभावतः एव तत्रस्थाः सर्वेपि राजानः स्त्रीत्वमधिगताः अभवन् । तद्दृष्ट्वा पद्मा अत्यन्तव्याकुलेन रोदितवती । कल्किदेवस्य दूतः सर्वज्ञशुकोपि पद्मायाः मुखात् पद्मायाः अत्यन्तदुःखकारणं ज्ञात्वा व्याकुलोभूत ।

**अहं वटस्थपरिधर्षितात्मा**
**पद्माविवाहोत्सवदर्शनाकुलः ।**

**तस्या वचनोन्तर्हृदि दुःखितायाः**

**श्रोतुं स्थितः स्त्रीत्वमितेषु तेषु ॥**

विवाहशुभावसरगते पद्मा स्वाराध्यं देवं शिवं हृदये ध्यायन्ती करुणविलापं कृतवती । शिवस्य उपदेशानुसारं सा सुन्दरी राजकन्या पद्मा विष्णोः आराधनामकरोत् । तद्यथा-

**जानीहि कल्के! कमलाविलापं**

**श्रुतं विचित्रं जागतामधीश ।**

**गते विवाहोत्सवमङ्गले सा**

**शिवं शरण्यं हृदये निधाय ॥**

एवम्प्रकारेण श्रीकल्किपुराणे भगवत्सम्बन्धी पद्मास्वयंवरो विशेषतो विवृतोस्ति ।

बोधप्रश्नः-

1. महाराजस्य बृहद्रथस्य पत्न्याः नाम किमासीत् ?

2. सिंहलदेशस्य राजकन्या पद्मा कस्मात् देवसकाशात् वरदानं प्राप्तवती ?

## कल्किदेवस्य दर्शनमात्रेण स्त्रीभावात् मुक्तानां राज्ञां दशावताररूपेण कल्केः स्तुतिकरणं तद्धिया दशावतारतत्त्वनिरूपणञ्च

सिंहलदेशस्य राजकन्यायाः पद्मायाः स्वयंवरे पद्मां कामदृष्टितो दृष्ट्वा स्त्रीभावमापन्नाः राजानः कल्किदेवस्य कृपातः पुनरपि पुरुषभावं संप्राप्य मत्स्यादिदशावताररूपेण कल्किदेवं स्तुतवन्तः । तेषां राज्ञां मत्स्यादिदशावताररूपेण कल्किदेवस्य स्तवनमत्र विज्ञानसम्मतधियापि आविष्क्रियते । अवतारतत्त्वं हिन्दुधर्मस्य मुख्यो विषयः । यद्यपि वेदेषु अवतारस्य सूचनामात्र विद्यते, तथापि पुराणेषु विस्तृतविवेचनं समुपलभ्यते । उपासनानिमित्तं भगवतः साकरत्वमपेक्षते । भगवान् विभिनेषु अवतारेषु साकारत्वं प्राप्तवान् । निराकारोऽपि भगवान् अवतारमाध्यमेन रूपं गृह्णाति । तैश्च रूपैः आराधितो भगवान् भक्तेभ्योऽमृतं ददाति । अनेनाऽवताररूपेण भगवान् धर्ममर्यादा-रक्षणार्थं युगे युगे अवतीर्य असाधूनां विनाशेन साधूनां रक्षणेन च स्वकार्यं सम्पादयति । जगत्यस्मिन् यदा धर्मस्य ह्रासोऽधर्मस्य वृद्धिः गोब्राह्मणानां विषादः सज्जनानामुद्वेगः, पापीनाञ्च समुल्लासो जायते, तदा भगवान् स्वयमाविर्भूय धर्मं रक्षति अधर्मं नाशयति दुर्जनान् निहत्य सज्जनान् च पालयति । अत्रावतारधारणस्य प्रयोजनानि ज्ञायन्ते यत्- प्रथमं सज्जनानां संरक्षणं, द्वितीयं दुष्टानां दमनं, तृतीयञ्च धर्मस्य संस्थापनमिति । धर्मसंस्थापनादिकं भगवता प्रेरितेन केनाऽपि

योगसिद्धजीवेन कर्तुं शक्यते । किन्तु जीवानां मोक्षो भगवत्प्राप्तिरूपो नान्येन केनापि भवितुमर्हति । अत: स्वयं भगवान् अवतीर्य विभिन्नानि रूपाणि धृत्वा कर्माणि च कृत्वा जीवानां मोक्षप्राप्तिं सरलीकरोति । भगवान् यानि रूपाणि नामानि च स्वीकृत्य कर्माणि करोति तानि नामरूपकर्मादीनि कीर्तयन् शृण्वन् स्मरन् च सांसारिको जनो मोक्षं लभते । अतो जीवानां निःश्रेयस: साधनम् एवाऽवतारस्य मुख्यं प्रयोजनं भवति । ईश्वरः सर्वरूपत्वात् सर्वेषु भूतेषु स्थित्वा सर्वाणि रूपाणि धारयति । अतो मत्स्यादिरूपेणैकस्येश्वरस्याविर्भावो विज्ञानसम्मत एव । अपि च मत्स्यकूर्माद्यवतारग्रहणक्रमो विज्ञानसमर्थितस्य सृष्टिक्रमस्यापि समर्थनं दृश्यते । पाश्चात्यवैज्ञानिको डारविन् महोदयः सृष्टेः क्रमं दर्शितवान् । तन्मते सृष्टिः प्रथमतः क्षुद्रपाणिभ्य आरभ्य महज्जीवपर्यन्तं प्रचलति । प्रारम्भकाले जन्तवो बुद्धिहीना आसन् । अनन्तरं क्रमशस्तेषु बुद्धेर्विकाशोऽभवत् । तथैव कल्किपुराणान्तर्गततयावतारवादे प्रथमतो जलीयजीवेभ्यः सृष्टिर्भवति । तत उभयचराणां ततश्च स्थलचराणां जीवानां सृष्टिर्जायते । तदनु पशुत्वमानवत्वयोः समावेशेन जीवसृष्टिर्भवति । ततो मानवताया विकाशो जायते । मानवसृष्टौ च वामनाकृतीनां मानवानां, ततः शास्त्रास्त्रजीविनां मानवानां विकाशो भवति । ततश्च सध्यानां विकशितानाञ्च आदर्शमानवानां प्रतिष्ठा भवति । अनन्तरं राजनीत्यादिकुशलताद्वारा संसारे शान्तिस्थापकानां मानवानां बहुलता दृश्यते । अनेन प्रकारेण विज्ञानदृष्ट्या मत्स्यकूर्मवराहादीनामवताराणां यथार्थताऽनुभूयते । विज्ञानमते प्रथमतः समग्रं विश्वं जलमयमासीत् । अतः प्रथमं जलजन्तोः मत्स्यस्य सृष्टिरभूत् । सृष्टेरिममेव विकाशं ज्ञापयितुं कल्किपुराणे मत्स्यावतार: प्रथमतया कथितः । ततो जले स्थले च समानरूपेण विचरणशीला: कूर्मसदृशाः प्राणिन उत्पद्यन्ते, एतदेव कूर्मावतारे स्पष्टीकृतम् । तदनु केवलं स्थलचरजीवानां सृष्टिर्जायते भगवतो वाराहावतार: इदमेव सूचयति । ततः पशुमानवयोः सम्मिलनेन प्रादुर्भूतो नृसिंहावतारोमानवस्य प्रथमसृष्टिं सूचयति । यस्यां सृष्टौ मानवत्वेन सह पशुत्वस्यापि सत्ताऽनुभूयते ततो मानवसृष्टिः पूर्णतया भवति । किन्तु तत्र मानवाकारे किञ्चित् ह्रस्वत्वमथवा खर्वत्वमनुभूयते । एतद् वामनावतार: सूचयति । ततो मानवेषु शस्त्रास्त्रप्रयोगेनाऽन्यान् भयभीतान् कुर्वन्तः समर्थमानवा दृश्यन्ते । तेषां प्रतिनिधित्वं करोति परशुरामावतारः । ततः समाजे आदर्शस्थापयितुमादर्शमानवानामुपयोगिता जायते । तेषां प्रतिनिधिः रामावतार एव । ततो राजनीते: आध्यात्मिकतायाश्च आवश्यकतानुभूयते । राजनीतौ अध्यात्मज्ञाने च कुशलतायुक्तानां मानवानां समादरो भवति । एतज्ज्ञापयति रामकृष्णावतारः । ततश्च मानवे यदा हिंसायाः प्रावल्यमनुभूयते तदाऽहिंसां प्रतिष्ठाप्य शत्रूनपि वशीकर्तुं कृपालो: मानवस्याऽवश्यकता जायते । तस्य प्रतिनिधिः बुद्धावतार इति

ज्ञायते । अन्ते संसारे शान्तिं स्थापयितुं दुष्टजनान् च दमयितुमतिसमर्थस्य जीवस्य प्रयोजनं भवति । अयमेव कल्क्यवतारोऽस्यैव प्रतीकभूतो वर्तते । अवतारवादे कल्किपुराणस्यानुक्रमः सृष्टिवादे वैज्ञानिकक्रमश्च द्वावेव युक्तिपूर्णौ प्रतीयेते । धार्मिकदृष्ट्या पौराणिकमतं, भौतिकदृष्ट्या वैज्ञानिकमतञ्च युक्तियुक्तं वर्तते । एवम्प्रकारेण कल्किदेवस्य कृपात: पुनरपि पुरुषभावमापन्नानां तेषां राज्ञां मत्स्यादिदशावताररूपेण कल्किदेवस्य स्तवनमत्र विज्ञानसम्मतधियापि आविष्कृतमस्ति ।

**बोधप्रश्नः**

1. भगवतः विष्णोः कति अवताराः भवन्ति ?

## सारांशः

प्रस्तुतपाठ्यांशस्य द्वितीयांशेस्मिन् विशेषतः **सिंहलदेशस्य राजकन्यायाः पद्मायाः तपश्चरणं तथा भगवतः शिवसकाशात् वरप्राप्तिः,सिंहलदेशस्य राज्ञा बृहद्रथेन स्वकन्यायाः पद्मावत्याः परिणयार्थे इच्छास्वयंवरायोजनञ्च वर्णितमस्ति** । तत्र स्वयंवरसभाङ्गणे प्रविष्टां सखिभिः परिवारितामत्यन्तसुन्दरीं राजकन्यां पद्मां दृष्ट्वा तत्रस्थाः सभामण्डपे समुपस्थिताः सर्वेपि राजानः सर्वतोभावेन संमोहिताः भूयः कामवासनागतहृदयधिया तामवलोकितवन्तः । यस्य फलस्वरूपेण ते सर्वेपि नृपगणाः तत्क्षणात् स्त्रीभावमासाद्य तेनैव तेनैव वयसा नार्यः भूत्वा पृथिव्यां पतिताः अभवन् । पद्मायाः कृते शिवदत्तपूर्ववरप्रभावत एव तत्रस्थाः सर्वेपि राजानस्तथैव स्त्रीत्वमापन्नाः सन्तः तामेव राजकन्यां पद्मां सखीभावतः अनुसृतवन्तः । ततः कल्किदेवस्य दर्शनमात्रेण स्त्रीभावात् मुक्तानां राज्ञां दशावताररूपेण कल्केः स्तुतिकरणञ्चेति विषया अत्र द्वितीयांशे सविशदमालोचिताः सन्ति ।

## आदर्शप्रश्नाः

### लघूत्तरीयप्रश्नाः-

1. इच्छास्वयंवरविषये लिखत ।

2. पद्मायाः शिवदत्तवरप्राप्तिः ।

3. राजगणानां स्त्रीभावप्राप्तिविषयमालोचयत ।

## विश्लेषणात्मकप्रश्नाः-

1. श्रीविष्णोः दशावतारविषये लिखत ।

2. पद्मायाः तपश्चरणमाविष्कुरत ।

## निबन्धात्मकप्रश्नाः-

1. सिंहलदेशस्य राजकन्यायाः पद्मायाः तपश्चरणं तथा भगवतः शिवसकाशात् वरप्राप्तिविषयोपस्थापनं कुरुत ।

2. पद्मावतीस्वयंवरवृत्तान्तं विशदयत ।

## एकाङ्कप्रश्नाः-

1. स्वयंवरः कतिविधः ।

2. श्रीविष्णोः कति अवताराः भवन्ति ।

3. श्रीविष्णोः आद्यावतारः कः ।

4. सिंहलदेशस्य राजकन्या पद्मा कं देवं पतिरूपेण प्राप्तुमिच्छति स्म ।

5. सिंहलदेशः कस्यां दिशि वर्तते ।

6. कल्किः पद्मायाः समीपे दूतरूपेण कं प्रेषितवान् ।

7. पद्मा श्रीविष्णोः समर्चनाविषये कमुक्तवती ।

8. सिंहलदेशस्य राजकन्यायाः पद्मायाः विषये कल्किदेवं कः उक्तवान् ।

9. कल्किदेवस्य कृते शिवेन दत्तशुकस्य वैशिष्ट्यं किमासीत् ।

10. कस्य दर्शनात् राजानः शापमुक्ताः भूत्वा पुनः पुरुषत्वमधिगताः ।

## उत्तराणि-

1. त्रिविधः 2. दश 3. मत्स्यावतारः 4. श्रीविष्णुदेवं 5. दक्षिणदिग्भागे

6. सर्वज्ञशुकं 7. सर्वज्ञशुकं 8. सर्वज्ञशुकः 9. सर्वज्ञत्वं 10. कल्किदेवस्य दर्शनात्

# तृतीयांशः

## प्रस्थावना-

द्वापरयुगादनन्तरं कलियुगमागच्छति । यदा पापस्य भारः अत्यधिको भवति तदा भगवान् विष्णुः अवतारं गृह्णाति । भगवतो विष्णोः तेष्वेव अवतारेषु दशमावतारो भवत्येषः कल्क्यवतारः । तस्यैव भगवतः कल्क्यवतारस्य चरितमस्मिन् कल्किपुराणे विभिन्नप्रसङ्गपुरःसरं सविशदं वर्णितमस्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य कल्किपुराणस्य आदितः पञ्चत्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र विषयसारतः चतुरंशेषु विभज्य सम्यगालोचिताः सन्ति । ततः चतुरंशेषु विभक्तस्यास्य पाठ्यांशस्य तृतीयांशेस्मिन् विशेषतः अनन्तमुनिप्रसङ्गः,राज्ञः शशिध्वजस्य कथा,कल्किपुराणगता भक्तिरिति विषया अत्र सम्यगुपन्यस्ताः सन्ति ।

## उद्देश्यम् -

प्रियपाठकाः कल्किपुराणस्यास्य प्रस्तुतेस्मिन् पाठ्यांशे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

1. अनन्तमुनिप्रसङ्गोपस्थापनम्

2. राज्ञः शशिध्वजस्य कथा

3. कल्किपुराणगता भक्तिः

## अनन्तमुनिकथा

कल्किपुराणे अनन्तमुने आख्यानम् द्वितीयांशस्य चतुर्थाध्याये पञ्चमे च सम्यक्तया विवृतमस्ति । पद्मायाः स्वंयवरमाख्यानात् परं राज्ञां स्त्रीत्वप्राप्तिविषये यदा मनुयः पृष्टवन्तः तदा भगवान् कल्किः अनन्तमुनिं स्मृतवान् । तत्र अनन्तमुनिः स्वयमुपस्थाय एव स्वकथां वक्तुमारभत । तद्यथा-

पुरिकायां पुरि पुरा पिता मे वेदपारगः ।

**विद्रुमो नाम धर्मज्ञ: ख्यात: परहिते रतः ।।**

पुरीकेति नगर्यां विद्रुम इति धर्मज्ञः वेदपारग: एको ब्राह्मणः आसीत् । तस्य पत्न्या: नाम सोमा । तौ वृद्धावस्थायां नपुंसकाकृतिमिव अनन्तमुनिं जन्म दत्तवन्तौ । अनन्तस्य पिता दुःखेन पुत्रस्य नपुंसकत्वं स्मृत्वा गृहं त्यक्त्वा शङ्करं पुजयितुं शिववनं गतवान् । सः तत्र धूपदीपादिलेपनैः विधानेन शिवपूजनं कृतवान् । तदा शिवः तस्य प्रार्थनया सन्तुष्टो भूत्वा वरं याचितुं उक्तवान् । तद्यथा-

**विद्रुमो मे पिता प्राह मत्पुंस्त्वं तापतापित: ।**

**हसन् शिवो ददौ पुंस्त्वं पार्वत्याः पतिमोदित: ।।**

अनन्तमुनिः कथयति - सदाशिवःमम कृते पुंस्त्वं वररूपेण दत्तवान् । तदा सन्तुष्टो मम पिता गृहमागत्य य़ज्ञरातस्य पुत्र्याः साकं मम विवाहं कारितवान् । तदनु शनैः शनैः गृहस्थाश्रमे प्रविश्य अहं पत्न्याः वशीभूतमभवम् । एवञ्च पितरौ निधनतां गतौ । ततः पारलौकिकं कर्म कृत्वाहं विष्णोः सेवायां लीनमभवम् । पितरौ आदि जपतपकर्मादिकञ्च माया इव प्रतीतिरिति विष्णोः वचनं श्रुत्वा अहं पुरुषोत्तमक्षेत्रं गतवान् । एवं भगवान् अनन्तमुनेः कृते मायादर्शनं कारयित्वा मायानिरसनमपि विहितवान् ।

**बोधप्रश्नः**

1. अनन्तमुनेः पितुः नाम किम् ?

### राज्ञः शशिध्वजस्य कथा

भल्लाटनगरे कल्केरागमनमभूत् । तस्मिन्नेव समये तत्र शशिध्वजनामधेयः कश्चिद् वैष्णवो नृपो राजासीत् । स राजा कल्केरागमनं श्रुत्वा कुपितो भूयस्तेन सह योद्धुमिष्टवान् । कल्किशशिध्वजयोर्मध्ये संघटिते घोरदुर्मदे रणे शशिध्वजो हतचेतनः कल्किना पराजितः । द्वैताद्वैतदर्शननिष्णातः स राजा स्वपत्न्यै सुशान्तायै द्वैताद्वैतमतवादस्य वैशिष्ट्यं प्राक् प्रतिपाद्य कल्किना सह तस्य युद्धं समर्थितवान् । किन्त्वधुना परास्तः सः तं कल्किं स्तौति । अथ चात्मनः कन्यां रामां तस्मै विवाहार्थाय प्रयच्छति । अन्ते च पूर्वजन्मनि प्राप्तगृद्ध्रावस्थयोस्तयोः प्राग् जन्मनो विस्तृतं वर्णनमुपलभ्यते । कथाप्रसङ्गेन विष्णोर्महत्त्वं, विष्णुपूजा, विष्णुभक्तिरित्यादीनि सर्वाणि व्याख्यायन्ते । प्राक् कृष्णाग्रजेन बलरामेण निहतो द्विविदो यथा स्वर्गं लेभे तथा सोऽपि राजा शशिध्वजः स्वर्गं कामयते । प्रसङ्गेस्मिन् शशिध्वजमुखात् श्रीकृष्णस्यापूर्वलीलाचातुरी सर्वेषां श्रोतृणां मनो हरति ।

**बोधप्रश्नः**

1. भल्लाटनगरे कः राजा आसीत् ?

## कल्किपुराणगता भक्तिः

कल्किपुराणस्य पञ्चविंशतितमे अध्याये भगवद्भक्तिविषयं सम्बोद्ध्य प्रोक्तमस्ति यत्- गुरौ प्रसन्ने भगवान् प्रसीदति । वाङ्मनोबुद्धीन्द्रियगणैः सह भगवन्तं ध्यात्वा एकान्तभावविद् विद्वान् आत्मानं हरावर्पयेत् । सेव्यसेवकभावेन भक्तिरनुष्ठानीया इति ।

सेव्यः कृष्णः सेवकोऽहमन्ये तस्यात्ममूर्तयः ।

कृष्णमतिर्मनस्यास्तां भक्तकल्याणकारिणी ।।३७।।

भक्तस्यापि हरौ द्वैतं सेव्यसेवकवत् तदा ।

नान्यद् विना तमित्येव क्व च किञ्चन विद्यते ।।३८।।

नृत्यत्युद्धतवद् रौति हसति प्रैति तन्मनाः ।

विलुण्ठत्यात्मस्मृत्या न वेत्ति कियदन्तरम् ।।३९।।

एवम्विधा भगवतो भक्तिरव्यभिचारिणी ।

पुनाति सहसा लोकान् देवदानवमानुषान् ।।४०।।

भक्तिः सा प्रकृतिर्नित्या ब्रह्मसंपत्प्रकाशिता ।

शिवविष्णुब्रह्मरूपा वेदाद्यानां वरापि वा ।।४१।।

उच्छिष्टमवशिष्टं वा पथ्यं पूतमभीप्सितम् ।

भक्तानां भोजनं विष्णोर्नैवेद्यं सात्विकं मतम् ।।४४।।

पुराणस्यास्य षड्विंशेऽध्याये तु दृष्टभक्तिफलोदया भक्ता भागवतीं मायामाश्रित्य प्रभुदासभावेन पुष्कलं सुखं लभन्ते इति निम्नोक्तश्लोकेषु सम्यक् वर्णितमस्ति । तद्यथा-

यदि विष्णुः स सर्वत्र तदा कं हन्ति को हतः ।।११।।

हन्ता विष्णुर्हतो विष्णुर्वधः कस्यास्ति तत्र चेत् ।।१२।।

अतो भागवतीं मायामाश्रित्य विधिना यजन् ।

प्रभुदासभावेनैव सुखं लभेत पुष्कलम् ।।१४।।

मोक्षं न कामयन्ते ते दृष्टभक्तिफलोदयाः ।

मुक्त्वा लभन्ते जन्मानि हरिप्रेमविकाशकाः ।।२३।।

निर्ममो निरहङ्कारः सर्वतो विरतो भव ।।(३०,३९)।।

एवम्प्रकारेण कल्किपुराणे विभिन्नप्रसङ्गपुरःसरं तदा तदा भगवद्भक्तिविषयो व्याहृतोस्ति ।

**बोधप्रश्नः**

1. कस्मिन् प्रसन्ने भगवान् प्रसीदति ?

# सारांशः

भगवतः कल्क्यवतारस्य चरितमस्मिन् कल्किपुराणे विभिन्नप्रसङ्गपुरःसरं सविशदं वर्णितमस्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य कल्किपुराणस्य आदितः पञ्चत्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र विषयसारतः चतुरंशेषु विभज्य सम्यगालोचिताः सन्ति । ततः चतुरंशेषु विभक्तस्यास्य पाठ्यांशस्य तृतीयांशेस्मिन् विशेषतः अनन्तमुनिप्रसङ्गः,राज्ञः शशिध्वजस्य कथा,कल्किपुराणगता भक्तिरिति विषया अत्र सम्यगुपन्यस्ताः सन्ति ।

## आदर्शप्रश्नाः

### लघूत्तरीयप्रश्नाः-

1. विद्रुममहर्षेः परिचयं प्रयच्छत ।
2. कल्किशशिध्वजयोः युद्धमुद्दिश्य लिखत ।
3. सेव्यसेवकभावेन भक्तिरनुष्ठानीया इति ।

### विश्लेषणात्मकप्रश्नाः-

1. कल्किपुराणगतं भगवद्भक्तिविषयं वर्णयत ।

2. अनन्तमुनेः विष्णुमायाभिज्ञानमाविष्कुरुत ।

**निबन्धात्मकप्रश्नाः-**

1. अनन्तमुनिप्रसङ्गमुपस्थापत ?

2. राज्ञः शशिध्वजस्य कथां वर्णयत ?

**एकाङ्कप्रश्नाः-**

1. अनन्तमुनेः पितुः नाम किम् ।
2. विद्रुमः कस्य पिता भवति ।
3. कल्किपुराणस्य कस्मिन् अंशे अनन्तमुनेः कथा अस्ति ।
4. ब्राह्मणः विद्रुमः कस्यां नगर्यां निवसति स्म ।
5. ब्राह्मणविद्रुमस्य पत्न्याः नाम किम् ।
6. ब्राह्मणविद्रुमः कं पूजयितुं वनं गतवान् ।
7. शङ्करं पूजयितुं विद्रुमः किं नामधेयं वनं गतवान् ।
8. कस्य पुत्र्याः साकं अनन्तस्य विवाहोभूत् ।
9. गृहस्थाश्रमे प्रविश्य अनन्तमुनिः कस्याः वशीभूतोभूत् ।
10. अनन्तमुनिः किं क्षेत्रमागतवान् ।
11. कः देवः अनन्तमुनिं स्वमायां प्रदर्शितवान् ।
12. कस्मिन् नगरे कल्केरागमनमभूत् ।
13. भल्लाटनगरस्य कः राजा आसीत् ।

14. शशिध्वजस्य पत्न्याः नाम किमासीत् ।

15. कस्मिन् प्रसन्ने भगवान् प्रसीदति ।

16. सेव्यसेवकभावेन किमनुष्ठानीया ।

## उत्तराणि-

1. विद्रुमः 2. अनन्तमुनेः 3. द्वितीयांशे 4. पुरिकेति नगर्यां 5. सोमा

6. शङ्करम् 7. शिववनम् 8. यज्ञरातस्य 9. स्वपत्न्याः वशीभूतोभूत्

10. पुरुषोत्तमक्षेत्रम् 11. विष्णुदेवः 12. भल्लाटनगरे 13. शशिध्वजः

14. सुशान्ता 15. गुरौ 16. भगवद्भक्तिः

# चतुर्थांशः

## प्रस्थावना-

भगवतः कल्क्यवतारस्य चरितमस्मिन् कल्किपुराणे विभिन्नप्रसङ्गपुरःसरं सविशदं वर्णितमस्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य कल्किपुराणस्य आदितः पञ्चत्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र विषयसारतः चतुरंशेषु विभज्य सम्यगालोचिताः सन्ति । ततः चतुरंशेषु विभक्तस्यास्य पाठ्यांशस्य चतुर्थांशेस्मिन् कल्केः धर्मयुद्धादिकं,सूर्यवंशसमुद्भवस्य मरु इत्याख्यस्य तथा चन्द्रवंशसमुद्भवस्य देवापि इत्याख्यस्य राज्ञो वर्णनं,कल्किपुराणे कृष्णस्यौपम्यं दर्शनञ्च,कल्किपुराणगततया वैष्णवधर्मः,कल्किपुराणगता देवादिस्तुतयस्तथा वैष्णवधर्मत्वेन कल्किपुराणस्य वैशिष्ट्यमिति विषया अत्र सम्यगुपन्यस्ताः सन्ति

## उद्देश्यम् -

प्रियपाठकाः कल्किपुराणस्यास्य प्रस्तुतेस्मिन् पाठ्यांशे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

1. कल्केः धर्मयुद्धादिकानां वर्णनम् ।
2. सूर्यवंशसमुद्भवस्य मरु इत्याख्यस्य तथा चन्द्रवंशसमुद्भवस्य ।

   देवापि इत्याख्यस्य राज्ञोः वर्णनम् ।
3. कल्किपुराणे कृष्णस्यौपम्यं दर्शनञ्च
4. कल्किपुराणगततया वैष्णवधर्मो देवादिस्तुतयश्च
5. वैष्णवधर्मत्वेन कल्किपुराणस्य वैशिष्ट्यम्

## कल्केः धर्मयुद्धादिकानां वर्णनम्

**अत्र कल्किपुराणान्तर्गततया कल्केः धर्मयुद्धादिकं तत् तत् अध्यायवर्णनानुसारमुपस्थाप्यते । तद्यथा- कल्किपुराणस्य चतुर्दशाध्याये** जिनोपदिष्टैः बौद्धैः सह कल्केर्महति रणे प्रायशः सर्वे बौद्धा विनाशमुपगच्छन्ति । अन्ते चेमे सर्वे म्लेच्छा आहूय कल्किं पराजेतुं वाञ्छन्ति । ततः **पञ्चदशाध्याये** कल्किस्तु बौद्धान् तथा म्लेच्छान् सर्वानपि पराजित्य तेन सह योद्धुमागतेभ्यो म्लेच्छबौद्धस्त्रिभ्यो ज्ञानभक्तिपरमयोगमुपदिशति । **षोडशाध्याये** कीकटप्रदेशात् प्रत्यागम्य

चक्रतीर्थे बालखिल्यैः सह कल्केः वार्ता प्रचलति । तत्र ते सर्वे कुथोदरी इत्याख्याया राक्षस्या तस्याः पुत्रात् विकञ्जाच्च भयभीताः त्रस्ता भृशं पीडिताश्चेति विज्ञाय तयोर्हनने कृतमतिः स कल्किः हिमालये गत्वा तान् हन्ति ।

ततः **एकोनविंशत्यध्याये** कृतयुगे यथा चतुर्दशमन्वन्तराणां क्रमशः उत्पत्त्यादिकं भवति तथा सर्वं वर्णितमस्ति । कलिपीडिता देवादयः सर्वे कल्किमुपेत्य तेषामार्तिहरणाय प्रार्थयन्ते । विशसननगर्यां प्रविश्य कलिं हनिष्यामीति प्रतिज्ञाय भगवान् कल्किः स्वपुरात् प्रचलति।

**ततः कल्किपुराणस्य विंशत्येकविंशत्यध्याययोः** मरुः देवापिः, अन्यान् च विश्वस्तान् अनुचरान् संगृह्य कल्किः कलिनाशनाय कृतमतिः प्रयत्नमाश्रयते । विशसननगर्यां धर्मः कलिना विताडितः । स एव धर्म आत्मनः पराजयस्य प्रतिहिंसां जिघृक्षन् कल्किना सह प्रचलति । एतत् सर्वं निशम्य खशाः,काम्बोजाः,शबराः, बर्बराश्चीनाः, पुलिन्दाश्चोलाः, निषादा विशेषतः कोकः विकोकश्चेमे सर्वे कलिसहायकाः कल्किना सह योद्धुमुद्यताः । अस्मिन् समये पराजयं स्वीकृत्य कलिः अन्यस्मिन् वर्षे पलायते । कल्किश्च यथेच्छं कलिं संयम्य निहन्ति । कल्केः पराक्रमात् कोकः विकोकश्च पञ्चत्वमुपागतौ । तदनु कल्किः पृथिवीतः कलिकालगतान् दोषान् दुष्टान् च सर्वान् विनश्य अयोध्यायां मथुरायां वारणावत्यां पुण्ड्रे अङ्गे वङ्गे कीकटे च स्वसाधुसेवकान् सर्वान् राज्याधिकारे संस्थाप्य अत्र धरातले सद्धर्मान् स्थापितवान् ।

**बोधप्रश्नः**

1. चक्रतीर्थे बालखिल्यैः सह कस्य वार्ता प्राचलत् ।

## सूर्यवंशसमुद्भवस्य मरु इत्याख्यस्य तथा चन्द्रवंशसमुद्भवस्य देवापि इत्याख्यस्य राज्ञोः वर्णनम् ।

**कल्किपुराणस्य सप्तदशाध्याये** तस्मिन्नेव हिमालये पर्वते सूर्यवंशस्थनृपस्य मरु इत्याख्यस्य तथा चन्द्रवंशसंभूतस्य देवापि इत्याख्यस्य राज्ञो वर्णनमुपलभ्यते । मरुः इक्ष्वाकुवंशगौरवं कल्कये निवेदयति । प्रसङ्गक्रमेण च भगवतो रामचन्द्रस्य कथा आलोच्यते । रामवंशस्य परिचयः तत्र उपलभ्यते । तस्य वंशे बुध इत्यपरनामधेयस्य मरोर्जन्म अभूदित्यादिवार्ता प्रचलति । अतः परं चन्द्रवंशस्य नृपाणां वर्णनं देवापिना क्रियते । तयोः सकाशाद् इदं सर्वं

विज्ञाय म्लेच्छानां पुक्कसानाञ्च निधनान्ते अयोध्याया हस्तिनापुर्याश्च सिंहासने यथाक्रमं मरुः देवापिश्च राजा भविष्यतः इति कल्किः प्रतिश्रृणोति । तस्यैवानुरोधेन राज्ञो विशाखयूपस्य कन्यां मरुः परिगृह्णाति । रूचिराश्वस्य कन्यां च देवापिः पत्नीरूपेण स्वीकरोति । कल्केः वरेण स्वर्ग्यं रथं लब्ध्वा मरुदेवापी प्रमुदितौ वर्णाश्रमधर्मस्य पुनः संस्थापनाय प्रयतेते ।

| |
|---|
| **बोधप्रश्नः** |
| 1. महाराजः मरुः कस्य वंशे सञ्जातः ? |
| 2. महाराजः देवापि कस्य वंशे उत्पन्नोभूत् ? |

## कल्किपुराणे कृष्णस्यौपम्यं दर्शनञ्च

कल्किपुराणे कल्केस्तच्चरितस्य वा सादृश्याय यदि केनाप्युपमा दर्श्यते ,तदा भगवता कृष्णेनैव नैवान्यैरवतारपुरूषैः। यद्यपीन्द्रशिवाभ्यां सहावश्यमुपमा (१ ,२७ ),तथापि तयोरवतारपुरूषाभावः । कल्केर्जन्मदिने वसुधा स्वकीयां पयःसुधाम्,मातृका च मंङ्गलवचः कृष्णजन्मदिनमिव दत्तवती(१ ,२७ ) । भक्तिभक्तमाहात्म्यनामके षड्विंशेऽध्याये “यथावतारः कृष्णस्य तथा तत्सेविनामिह" इति द्रष्टव्यम् । एवमेव--

**कृष्णे भावमनन्यमेवममलं हैयङ्गवीनं नवं ।**

**लब्ध्वा संसृतिनाशनं त्रिभुवने श्रीकृष्णतुल्यायते ।।(२६ ,२८ )**

**अतोऽहं कल्किरूपाय कृष्णाय परमात्मने ।।(२७,३४ )**

**मन्ये न भौतिको देहो वैष्णवस्य जगत्त्रये ।**

**यथावतारे कृष्णस्य सतो दुष्टनिपीडने ।।(३०,२० )**

व्रतादिप्रसङ्गेऽपि नास्ति सीताव्रतोल्लेखः । एकत्रिंशत्तमेऽध्याये कल्केरभिमतं ज्ञात्वाकारयद् रुक्मिणीव्रतमिति रुक्मिणीव्रतनिरूपणमेव । अतः उपर्युक्तकारणादिहेतोः कल्किपुराणे कृष्णस्यौपम्यं सम्यक् आविष्कृतमस्ति ।

कल्किपुराणे निम्नोक्तप्रकारतया दर्शनानि उपन्यस्तानि सन्ति। तद्यथा- मायादर्शननामके एकादशाध्यायेऽनन्तमायानिरूपणाख्ये द्वादशे चाध्याये सृष्टिः(12, 13-14), मायास्वरूपम् ( १२,१२ ) संसारकारणरूपोऽहङ्कारः (१२,१५ ), तन्मात्राणि महाभूतानि ( १२,१६ ) वर्णितानि सन्ति। मायया वशेनात्मविस्मृतिः (१२,१८ ), मायया बलवत्ववर्णनञ्च हृदयस्पर्शि । मायया मोहवशाद् जीवपुरूष आत्मानं विस्मिरति (१२,१९ )। इन्द्रियनिग्रहेण मनोनिग्रहः स्वाभाविकः । इन्द्रियाधिष्ठातृदेवानां नामानि च वर्णितानि सन्ति अस्मिन् कल्किपुराणे इति जानीमो वयम्।

## कल्किपुराणगततया वैष्णवधर्मो देवादिस्तुतयश्च

चक्राङ्कितो वैष्णवो वैकुण्ठं लभते(२५ ,१२ -१३ ) —

चक्राङ्कितं शिलागङ्गामरणादपि तत्क्षणात्।

ज्योतिर्मयविमानेन सद्यो भूत्वा चतुर्भुजौ ।।

प्राप्तौ वैकुण्ठनिलयं सर्वलोकसुखावहम्।

मन्त्राक्षरलेखनेन ज्वरादिनाशोपाय: सप्तविंशेऽध्याये वर्णितः—

समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः।

ऐकाहिकं ज्वरं हन्ति लिखनं यस्तु पश्यति ।।१७।

इति मन्त्राक्षरं द्वारि लिखित्वा तालपत्रके।

यस्तु पश्यति तस्यापि नश्यत्यैकाहिकज्वर: ।।१८।

*इदानीं कल्किपुराणगता देवादिस्तुतय: यथाग्रन्थमालोच्यते*।

महापुराणेषूपपुराणेषु च भक्तैः कृता देवादीनां स्तुतय: स्तवा वा नूनं विशिष्टो निधि:।

श्रीमद्भागवतपुराणे वेदस्तुतिर्निकामं महनीया। कल्किपुराणे सप्तसंख्यकानां स्तवानां वैशिष्ट्यं वरीवर्तते। ते चेत्थम्—

1.कल्किकृत: शङ्करस्तव:(३,१४),2.पद्माकृतो नारायण—(कल्कि)—स्तव:(७,११–३०), 3.स्त्रीभावप्राप्तराजभिर्विहितो गद्यमय:स्तव:(१०,२१), 4.सुशान्ताकृतकल्किस्तव:(२४,८), 5.शशिध्वजकृतमायास्तवः 6.देवैर्विहिता कल्किस्तुतिः 7.ऋषिभि: कृतो गङ्गास्तवश्च(३४,४-१२)।

मनोहरेषु सर्वेष्वेतेषु स्तवेषु गङ्गास्तवो मनोहरतमः इति विदन्ति विद्वांसः।

## वैष्णवधर्मत्वेन कल्किपुराणस्य वैशिष्ट्यम्

यथा शशिध्वजो राजा वैष्णवीयं द्वैताद्वैतवादं व्याख्याति, एवं यथा विष्णोरवतारभूतस्य भगवतः कल्केरुत्पत्तिमाहात्म्यं, विष्णुधर्मप्रचारः,परधर्मस्यानुपादेयत्वमत्र समुपलभ्यन्ते तथानेनानायासेनैव कैश्चिदनु मातुं शक्यते यदयं ग्रन्थो विशिष्टो वैष्णवप्रबन्ध एव नान्यः कश्चित्। तत्र वासुदेवस्याष्टाक्षरमन्त्रपूजनेन विष्णोरवतारस्य रामचन्द्रस्य माहात्म्यं वैशद्येन वर्ण्यते। कृष्णबलभद्रादीनां महाभारतसूत्रधराणां वैष्णवपुरुषोत्तमानां लीलामाहात्म्यविशदीकरणेनान्ते च बौद्धादिकानां पाषाण्डादीनां मतानि निराकृत्य वैष्णवधर्मस्य प्रचारप्रसङ्गेन मतमिदं दृढतरं समर्थितं भवति। यथा भगवान् कल्किः खशकाम्बोजशवरबर्वरचीनपुलिन्दचोलनिषादादीन् पराजित्य बौद्धधर्मस्य माहात्म्यं दूरीकृत्य च वैष्णवधर्मेणेदं भारतवर्षं प्लावितमकरोत् तथा तत्र भगवतः शङ्कराचार्यस्य वेदमार्गविरोधिनां वौद्धजैनधर्माणां पराभव एव स्मर्यते।

**बोधप्रश्नः-**

1. कः राजा वैष्णवीयं द्वैताद्वैतवादं व्याख्याति ?

## सारांशः

कल्किपुराणस्य पाठ्यक्रमेस्मिन् चतुरंशेषु विभक्तस्यास्य पाठ्यांशस्य चतुर्थांशेस्मिन् कल्केः धर्मयुद्धादिकं,सूर्यवंशसमुद्भवस्य मरु इत्याख्यस्य तथा चन्द्रवंशसमुद्भवस्य देवापि इत्याख्यस्य राज्ञो वर्णनं,कल्किपुराणे कृष्णस्यौपम्यं दर्शनञ्च,कल्किपुराणगततया वैष्णवधर्मः,कल्किपुराणगता देवादिस्तुतयस्तथा वैष्णवधर्मत्वेन कल्किपुराणस्य वैशिष्ट्यमिति विषया अत्र सम्यगुपन्यस्ताः सन्ति

## आदर्शप्रश्नाः

### लघूत्तरीयप्रश्नाः-

1. कल्किपुराणे कृष्णस्यौपम्यमाविष्कुरुत ।
2. कल्किपुराणान्तर्गततया दर्शनानि विलिखत ।
3. सूर्यवंशस्य विषये किञ्चित् लिखत ।

### विश्लेषणात्मकप्रश्नाः-

1. वैष्णवधर्मत्वेन कल्किपुराणस्य वैशिष्ट्यमाविष्कुरुत ।
2. कल्किपुराणगततया वैष्णवधर्मो देवादिस्तुतयश्च ।

### निबन्धात्मकप्रश्नाः-

1. कल्केः धर्मयुद्धादिकानां वर्णनं कुरुत ।
2. सूर्यवंशसमुद्भवस्य मरु इत्याख्यस्य तथा चन्द्रवंशसमुद्भवस्य
 देवापि इत्याख्यस्य राज्ञोः वर्णनं कुरुत ।

### एकाङ्कप्रश्नाः-

1. मरुराजः कस्मिन् वंशे उत्पन्नोभूत् ।

2. देवापिराजः कस्मिन् वंशे उत्पन्नोभूत् ।

3. श्रीरामचन्द्रः कस्मिन् वंशे उत्पन्नोभूत् ।

4. विकञ्जः कस्याः पुत्रः ।

5. कल्किपुराणस्य कस्मिन् अध्याये रुक्मिणीव्रतोपाख्यानं वर्णितमस्ति ।

6. कः राजा वैष्णवीयं द्वैताद्वैतवादं व्याख्याति ।

7. चक्रतीर्थे बालखिल्यैः सह कस्य वार्ता प्राचलत् ।

8. सुशान्ता का ।

9. शङ्करस्तवः केन विहितः ।

10. नारायणस्तवः कया विहितः ।

10. कल्किस्तवः कया विहितः ।

11. मायास्तवः केन विहितः ।

12. देवैः कस्य देवस्य स्तुतिर्विहिता ।

13. गङ्गास्तवः कैः विहितः ।

14. महाभूतानि कति भवन्ति ।

15. तन्मात्राणि कति भवन्ति ।

## उत्तराणि-

1. सूर्यवंशे 2. चन्द्रवंशे 3. सूर्यवंशे 4. कृथोदरी इत्याख्यायाः राक्षस्याः

5. एकत्रिंशत्तमे अध्याये 6. राजा शशिध्वजः 7. कल्केः 8.महाराजशशिध्वजस्य पत्नी 9. कल्किना 10. पद्मावत्याः 11. शशिध्वजेन 12. कल्किदेवस्य

13. ऋषिभिः 14. पञ्च 15. पञ्च

***************